पद्मालया देवि ! निधेया वैष्णवीरसि" हरिवं० ९८अ० आदिः तु शार्ङ्गरवा० स्त्रियां ङीन् । आनिधेयी

**निध्यान** न० नि+ध्यै—भावे ल्युट् । निर्वर्णने दर्शने अमरः

**निध्रुव** पु० गोत्रप्रवर्त्तकर्षिप्रवरर्षिभेदे "निध्रुवाणां काश्यपा वत्सारनैध्रुवेति" आश्व०श्रौ० १२।१४।७ गोत्रप्रवरोक्तौ

**निध्रुवि** त्रि० नितरां ध्रुवति ध्रु—स्थैर्ये कि । नितरां स्थैर्यान्विते । "यो मर्त्येषु निध्रुविर्ऋतावा" ऋ०७।२।१

**निध्वान** पु० नि+ध्वन—भावे घञ् । शब्दमात्रे शब्दरत्ना०।

**निनङ्क्षु** त्रि० नष्टुमिच्छुः नश—सन्—उ नुम् । अदर्शनं प्राप्तुमिच्छौ "अविस्फुरच्च बन्धूनां निनङ्क्षुर्विक्रमं शुचः" भट्टिः ।

**निनद** पु०नि+नद—भावे अप् । १शब्दे अमरः २रथतुल्य-शब्दे शब्दार्थचि०। "उच्चचार निनदोऽम्भसि तस्याः" रघुः।

**निनयन** न० नि+नी—ल्युट् । १निष्पादने "नाभिव्याहारयेत् ब्रह्म स्वधानिनयनादृते" मनुः "निनयनं निष्पादनम्" कुल्लू० । २परासिचने च निपूर्वकस्य नयतेः परिषेकार्थ-त्वात् तथात्वम् । "बर्हिषि पूर्णपात्रं निनयेत्" आश्व० गृ०सू० १।१०।२२ "निनयेत् सिञ्चेदित्यर्थः नारा० "एषो-ऽवभृथः" ४सू० "यदिदं पूर्णपात्रनिनयनं एषोऽस्य कर्मणोऽवभृथो भवति" नारा० "उदकं चमसं निनयेयुः" द्राह्या०सू० "निनयेयुः परासिञ्चेयुः" ताण्ड्य० ब्रा०भा

**निनर्त्तशत्रु** त्रि० देवश्रवस उद्धवस्य पुत्रभेदे "निनर्त्त-शत्रुं शत्रुघ्नं देवश्रवाव्यजायत" हरिवं० ३५अ०

**निनर्द** पु० नि+नर्द—भावे घञ् । वेदशब्दस्योच्चारणभेदे । तत्प्रकारः आश्व० श्रौ० ८।२।९ "तृतीये तु पादेष्वादितो यदक्षरं तदनुदात्तीकृत्य ब्रूयात् । एतदुक्तं भवति तृती-येषु प्रथममादित इत्यर्थः । आदितो ये द्वे अक्षरे तयोः पूर्वमनुदात्तं तस्मात् परं द्वितीयम् उदात्तं यथा भवेत् तथा निनर्देत् नितरां ब्रूयादित्यर्थः । तदेवमुच्चारणं निनर्दशब्देनोच्यत इत्यर्थः" नारा० "तस्योत्तमावर्जं तृतीयेषु न्यूङ्खो निनर्दश्च" ७।११।९ "तस्य सूक्तस्य याः पुरस्तात् प्रागुत्तमाया ऋचस्तासां तृतीयेषु पादेषु न्यूङ्खो निनर्दश्च कर्त्तव्यः । उत्तमापि न्यूङ्खनिनर्दर-हिता शस्तव्येव" नारा० "स्वरादिरन्त ओकारश्चतुर्नि-नर्दः" ११अ० तृतीयेषु पादेषु निनर्द उक्तः । तेषु कस्मिन् प्रदेश इत्युच्यते । पादान्ते । स्वरादिः स्वरो वाटिप्रदेश इत्यर्थः स चौकारश्चतुष्कृत्वो वक्तव्यः स निनर्दः इत्युच्यते" नारा० ।

**निनाद** नि+नद—पक्षे घञ् । शब्दमात्रे अमरः "ज्यानिना-दमथ गृह्णती तयोः" रघुः ।

**निनाह्य** पु० नीचैर्नाह्यः भूमौ निखननीयः नि+नह—कर्मणि ण्यत् । भूमौ नीचैः खननीये १मणिके २महा घटे च "अस्तमितश्चेत् निनाह्यात् पुरेजानश्चेत्" कात्या० श्रौ०८।९।५८ "निनाह्यात् मणिकात्" संग्रहः "यदि पुरेजानः स्यात् निनाह्यात् गृह्णीयात्" शत०ब्रा० ३।९।२।८ "निनाह्यात् खण्डस्थितप्रभूतघटादेः" भा० ।

**निनित्सु** पु० निन्दितुमिच्छुः निन्दि—सन—उ वेदे नि०। निन्दितुमिच्छौ "आरे तं शंसं कृणुहि निनित्सोः" ऋ० ७।२५।२ लोके तु निनिन्दिषु तत्रार्थे ।

**निन्दक** नि० निन्द—ण्वुल् । गर्हाकारके निन्दाकारके "परी-वादात् खरो भवति श्वा वै भवति निन्दकः" मनुः

**निन्दतल** पु० निन्द—कर्मणि घञ् निन्दः निन्द्यं तलमस्य । निन्दितहस्ते शब्दर०

**निन्दन** न० निन्दि—भावे ल्युट् । गर्हणे शब्दरत्ना०।

**निन्दा** स्त्री निन्दि—भावे अ। अविद्यमानदोषाभिधाने १गर्हणे "वेदनिन्दारतान् मर्त्यान् देवनिन्दारतांस्तथा । द्विज-निन्दारतांश्चैव मनसापि न चिन्तयेत् । न चात्मानं प्रशंसेद्वा परनिन्दाश्च वर्जयेत् । वेदनिन्दां देवनिन्दां प्रयत्नेन विवर्जयेत्" कौर्मपु०१५अ०। २अनिष्टसाधनत्वबो-धनद्वारा विध्यर्थप्रशंसावचने च "न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि तु विधेयं स्तोतुम्" न्याय०।

**निन्दार्थवाद** पु० निन्दारूपोऽर्थवादः । मीमांसकोक्ते अर्थवादभेदे अर्थवादशब्दे ३६९ पृ० दृश्यम् उदाहर-णान्तरं लौगाक्षिभास्करेण दर्शितं यथा "तत्र निन्दार्थ-वादो यथा "असत्रं वा एतद् यदच्छन्दोमम् अश्रुजं हि रजतं यो बर्हिषि ददाति पुरास्य संवत्सराद्गृहे रुदन्ति"

**निन्दास्तुति** स्त्री निन्दया स्तुतिः । व्याजेन निन्दाद्वारा स्तुतौ अलङ्कारशब्दे व्याजस्तुत्यलङ्कारे ४०५पृ० दृश्यम् ।

**निन्दित** त्रि० निन्द—क्त । १गर्हिते २धिक्कृते जटा० "विहि-तस्याननुष्ठानात् निन्दितस्य च सेवनात्" याज्ञ०। निन्दि-तञ्च शास्त्रलोकयोर्गर्हितम् । तत्र शास्त्रे निन्दितं शूद्र-प्रतिग्रहादि लोकगर्हितमतिभोजनादि ।

"अस्वर्ग्यं लोकविद्विष्टं तस्मात् तत् परिवर्जयेत्" मनुः "यद्यपि शिष्टं लोकविरुद्धं नाचरणीयं नाचरणीयमिति" मिताक्षराधृतवचनम् । [वत्सायां हेमच० ।

**निन्दु** स्त्री निन्द्यतेऽप्रजस्त्वेनासौ निन्दि—कर्मणि उ । मृत-